योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १९९

नवनवत्यधिकशततमः सर्गः १९९

श्रीराम उवाच ।

नित्यं ज्ञानैकनिष्ठत्वादात्मारामतया तथा ।

मुक्तैः कर्मपरित्यागः कस्मान्न क्रियते मुने ।। १

श्रीवसिष्ठ उवाच ।

हेयोपादेयदृष्टी द्वे यस्य क्षीणे हि तस्य वै ।

क्रियात्यागेन कोऽर्थः स्यात्क्रियासंश्रयणेन वा ।। २

न तदस्तीह यत्त्याज्यं ज्ञस्योद्वेगकरं भवेत् ।

न वास्ति यदुपादेयं तज्ज्ञसंश्रेयतां गतम् ।। ३

ज्ञस्य नार्थः कर्मत्यागैर्नार्थः कर्मसमाश्रयैः ।

तेन स्थितं यथा यद्यत्तत्तथैव करोत्यसौ ।। ४

यावदायुरियं राम निश्चितं स्पन्दते तनुः ।

तद्यथाप्राप्तमव्यग्रं स्पन्दतामपरेण किम् ।। ५

अन्यथान्यत्र चेत्कार्या क्रिया त्यक्त्वा निजं क्रमम् ।

समाने हि क्रियास्पन्दे को दोषः सत्क्रमे किल ।। ६

समया स्वच्छया बुद्ध्या सततं निर्विकारया ।

यथा यत्क्रियते राम तददोषाय सर्वदा ।। ७

इह मह्यां महाबाहो बहवो बहुदृष्टयः ।

बहुधा बहुदोषेषु विहरन्ति विचक्षणाः ।। ८

गतसङ्गतया बुद्ध्या विहरन्ति यथास्थितेः ।

गृहस्थारम्भिणः केचिज्जीवन्मुक्ताः स्थिता भुवि ।। ९

तज्ज्ञा राजर्षयश्चान्ये वीतरागा भवादृशाः ।

असंसक्तधियो राज्यं कुर्वन्ति विगतज्वराः ।। १०

केचित्प्रकृतवेदार्थव्यवहारानुसारिणः ।

यज्ञशिष्टाशिनो नित्यमग्निहोत्रे व्यवस्थिताः ।। ११

केचिच्चतुर्षु वर्णेषु ध्यानदेवार्चनादिकाम् ।

स्वक्रियामनुतिष्ठन्तः स्थिता विविधयेहया ।। १२

केचित्सर्वपरित्यागमन्तः कृत्वा महाशयाः ।

सर्वकर्मपरा नित्यं तज्ज्ञा एवाज्ञवत्स्थिताः ।। १३

स्वप्नेऽप्यदृष्टलोकासु मुग्धमुग्धमृगासु च ।

वनावनीषु शून्यासु केचिद्ध्यानपरायणाः ।। १४

पुण्यवद्भिः सदा जुष्टे पुण्योपचयकारिणि ।

शमशालिसमाचारे केचिदायतने स्थिताः ।। १५

रागद्वेषप्रहाणार्थं त्यक्त्वा देशं समाशयाः ।

केचिदन्यत्र देशे च पदमालम्ब्य संस्थिताः ।। १६

वनाद्वनं पुराद्ग्रामं स्थानात्स्थानं गिरेर्गिरिम् ।

भ्रमन्तः संस्थिताः केचित्संसारोच्छित्तये बुधाः१७

वाराणस्यां महापुर्यां प्रयागे चैव पावने ।

श्रीपर्वते सिद्धपुरे बदर्याश्रमके तथा ।। १८

शालग्रामे महापुण्ये कलापग्रामकोटरे ।

मथुरायां च पुण्यायां तथा कालञ्जरे गिरौ ।। १९

महेन्द्रवनगुल्मेषु गन्धमादनसानुषु ।

दर्दुराचलवप्रेषु सह्यकाचलभूमिषु ।। २०

विन्ध्यशैलस्य कच्छेषु मलयस्योदरेषु च ।

कैलासवनजालेषु ऋक्षवत्कुहरेषु च ।। २१

एतेष्वन्येषु चान्येषु वनेष्वायतनेषु च ।

तपस्विनस्तथा राम बहवो बहुदृष्टयः ।। २२

केचित्त्यक्तनिजाचाराः केचिच्च क्रमसंस्थिताः ।

केचित्प्रबुद्धमतयो नित्यमुन्मत्तचेष्टिताः ।। २३
केचित्स्वदेशरहिताः केचित्त्यक्तनिजास्पदाः ।
एकस्थानरताः केचिद्भ्रमन्तः केचिदास्थिताः ।। २४
एतेषां महतां मध्ये नभस्तलनिवासिनाम् ।
पातालनिरतानां च दैत्यादीनां महामते ।। २५
विज्ञातलोकपर्यायाः सम्यग्दर्शननिर्मलाः ।
केचित्प्रबुद्धमतयो दृष्टदृश्यपरावराः ।। २६
अप्रबुद्धधियः केचिद्दोलान्दोलितचेतसः ।
निवृत्ताः पापकाचारात्सुजनानुगताः स्थिताः ।। २७
अर्धप्रबुद्धमतयः केचिज्ज्ञानावलेपतः ।
परित्यक्तक्रियाचारा उभयभ्रष्टता गताः ।। २८
इत्थमस्मिञ्जनानीके जन्मसंतरणार्थिनः ।
बहवः संस्थिता राम बहुधा बहुदृष्टयः ।। २९
संसारोत्तरणे तत्र न हेतुर्वनवासिता ।
नापि स्वदेशवासित्वं न च कष्टतपःक्रियाः ।। ३०
न क्रियायाः परित्यागो न क्रियायाः समाश्रयः ।
नाचारेषु समारम्भविचित्रफलपालयः ।। ३१
स्वभावः कारणं नाम संसारोत्तरणं प्रति ।
असंसक्तं मनो यस्य स तीर्णो भवसागरात् ।। ३२
शुभाशुभाः क्रिया नित्यं कुर्वन्परिहरन्नपि ।
पुनरेति न संसारमसंसक्तमना मुनिः ।। ३३
शुभाशुभाः क्रिया नित्यमकुर्वन्नपि दुर्मतिः ।
निमज्जत्येव संसारे परित्यक्तमनाः शठः ।। ३४
मक्षिकेवान्तःसारज्ञा दुःखादुःखप्रदायिनी ।
न निवारयितुं शक्या न च मारयितुं मतिः ।। ३५
काकतालीययोगेन कदाचित्स्वस्य चेतसः ।

प्रवृत्तिर्जायते सिध्यै स्वयमात्मावलोकने ।। ३६

अवलोकनतो लब्ध्वा तत्त्वं नैर्मल्यमागतम् ।

चेतो भवति निर्द्वन्द्वमसंसक्तमनामयम् ।। ३७

अचित्तत्वं प्रयातेन सत्त्वरूपेण चेतसा ।

समो भूत्वा सुखं तिष्ठ पराकाशांशरूपभृत् ।। ३८

अधिगतपरमार्थस्त्यक्तरागादिदोषः

सममतिरुदितात्मा त्वं महात्मा महात्मन् ।

रघुतनय विशोकस्तिष्ठ निःशङ्कमेको

जननमरणमुक्तं पावनं तत्पदं त्वम् ।। ३९

प्रकृतिमलविकारोपाधिबोधादिरूपं

जगति विमलरूपे नास्ति किंचित्क्वचिच्च ।

स्फुटमकृतकमस्ति ब्रह्म चिद्धाम तच्च

स्वयमहमिति मत्वा तिष्ठ निःशङ्कमेकः ।। ४०

अधिकवचनगम्यं नान्यदस्त्यङ्ग किंचि-

त्तव शुभमुपदेश्यं ज्ञानसंबोधनाय ।

उदितमखिलमाद्यं ज्ञानसारं समग्रं

विदितसकलवेद्यो राघव त्वं हि जातः ।। ४१

श्रीवाल्मीकिरुवाच ।

इत्युक्त्वा मुनिनायको व्यपगताशेषैषणे राघवे

सर्वस्मिंश्च सभाजने स्थितवति ध्यानैकतानोपमे ।

प्राप्ते ब्रह्मपदं धिया धवलया तूष्णीमभूत्षट्पदः

कृत्वेवारणितं सरोजपटले पातुं प्रवृत्तो रसम् ।। ४२

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० मुक्तपुरुषस्थितिवर्णनं नाम नवनवत्यधिकशततमः सर्गः ।। १९९ ।।